भूतिटीकानुसारमनेकविधमान्तर्यपरिभाषाविमर्शः

श्री शिवप्रसाद-शुक्लः *

Abstract

[परिभाषायाः क्रमविषये प्रसङ्गसङ्गतिं निरूप्य चेता इत्यादौ प्रमाणकृदान्तर्यात् अकारघटितस्य चता इति रूपस्य पाक्षिकापत्तिं प्रदर्श्य "यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः" इति परिभाषया चेता इत्यादौ प्रमाणकृदान्तर्यात् अकारघटितस्य चता इति रूपस्य पाक्षिकापत्तिं निवार्य परिभाषायाः स्पष्टार्थमुक्त्वा परिभाषायाः सिद्धौ प्रमाणत्वेन "षष्ठी स्थानेयोगा" [अष्टाध्यायी १.१.४९] इति सूत्रस्य योगविभागमुपन्यस्य नियमांशे सति सम्भवे इति योजनस्य प्रयोजनं प्रतिपाद्य मूलोक्तपङ्क्तौ ल्यबन्तघटितवाक्योपपत्तिं च प्रदर्श्य तमब्ग्रहणस्यानेकविधान्तर्यसत्तागमकत्वमिति प्रसाध्य तमब्ग्रहणस्य स्वांशे चारितार्थ्यप्रकारं निरूप्य केवलं तमब्ग्रहणस्यानेकविधान्तर्यसत्तागमकत्वमिति मतं निराकृत्य उदाहरणं पुरस्कृत्य चतुर्विधान्तर्यनिरूपणमित्यादयः विषयाः सविस्तरं शोधपत्रेऽस्मिन् प्रपञ्चिताः ।]

कुञ्चिकाशब्दाः— अनेकविधमान्तर्यम्, स्थानेयोगा, तमब्ग्रहणम्, प्रसङ्गः, अन्तरतमः ।

प्रस्तावना

अस्ति हि व्याकरणे विधिशास्त्राणां प्राधान्यं तदितराणि च सूत्राणि गौणानि विध्युपकारकत्वात्, तथैव परिभाषेन्दुशेखरे परिगणितानां परिभाषाणामपि तत्तद्विधिशास्त्रोपकारकत्वं भवति, अत एव शब्द-धार्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सह-कारित्वम् एषां प्रतिबोधितं वैयाकरणैः । परिभाषेन्दुशेखरग्रन्थे मङ्गलाचरणे परिभाषेन्दुशेखरम् इति वचनेन अनुबन्धचतुष्टयेषु विषयः दर्शितः परन्तु सर्वासां परिभाषाणां व्याख्यानाभावेन न्यूनतापत्तिः न भवेत् अतः स्वतः ग्रन्थकृता वैयाकरणकेशरिणा नागेशेन ग्रन्थादौ व्याख्येयपरिभाषाः प्रतिज्ञाताः—"प्राचीनवैयाकरणतन्त्रे वाचनिकान्यत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरूपनिबद्धानि यानि परिभाषा-रूपाणि तानि व्याख्यायन्ते" इति । तेन "षष्ठी स्थानेयोगा" इत्यादीनां व्याख्यानाभावेन न न्यूनता, व्याख्येयपरिभाषात्वं नाम सङ्केतग्राहकभिन्नत्वे सति शब्दधार्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दित-

* अतिथि-अध्यापकः (सहायकाचार्य-श्रेणी), व्याकरणविभागे, नासिकपरिसरे, केन्द्रीयसंस्कृतविश्वविद्यालये ; Email : shivprasadshukla160804@gmail.com

बोधे सहकारित्वेन मुन्यभिप्रेतत्वे सति पाणिन्युच्चरितभिन्नत्त्वम् ।[१] "असिद्धं बहिरङ्गमन्तरङ्गे" इत्यादीनां स्वातन्त्र्येण व्यवस्थापिकानां व्याख्येयपरिभाषात्वं पाणिनिप्रयत्नानुमितत्त्वसादृश्याद् आरोपितं बोध्यम् ।

परिभाषाणां त्रिधा विभागः दरीदृश्यते—१. वाचनिकी, २. न्यायसिद्धा, ३. ज्ञापकसिद्धा ।[२]

पुनः १. वाचनिक्यः— क. सूत्रवाचनिकी यथा "षष्ठी स्थानेयोगा" [अष्टाध्यायी १.१.४९] इति सूत्रसिद्धा "निर्दिश्यमानस्य आदेशाः भवन्ति" इति । ख. स्वतन्त्रवाचनिकी यथा "यस्मिन् विधिस्तदादावल्ग्रहणे" इति परिभाषा "येन विधिस्तदन्तस्य" [अष्टाध्यायी १.१.७२] इति सूत्रभाष्ये पठिता ।

२. न्यायसिद्धाश्च— क. लौकिकन्यायसिद्धाः यथा "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति परिभाषा लोके देवदत्तस्य अङ्गाधिक्ये तद्विशिष्टस्यैव देवदत्तग्रहणेन ग्रहणं दृश्यते इति लौकिकन्यायसिद्धा वर्तते । ख. शास्त्रीयन्यायसिद्धाः यथा "परान्नित्यं बलवत्" । एषा परिभाषा अक्लृप्ताभावस्य अभावकल्पनापेक्षया क्लृप्तभावस्यैव अभावकल्पनम् उचितम् इति मूलकयुक्तिसिद्धा ।

३. ज्ञापकसिद्धाः— यथा "नानुबन्धकृतमनेकाल्त्वम्" । एषा परिभाषा "अनेकाल्शित्सर्वस्य" [अष्टाध्यायी १.१.५५] इति सूत्रस्थशिद्ग्रहणेन ज्ञापितास्ति ।

अनेकविधपरिभाषासु "षष्ठी स्थानेयोगा" [अष्टाध्यायी १.१.४९] इति सूत्रसिद्धा परिभाषा "यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः" इति ।

परिभाषाक्रमे सङ्गतिः

उदस्थात् इत्यादौ "उदः स्थास्तम्भोः पूर्वस्य" [अष्टाध्यायी ८.४.६१] इति सूत्रेण अट्विशिष्टस्थाशब्दस्य "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति परिभाषया पूर्वं सवर्णः प्राप्तः, तस्य वारणाय, स्थानी स्थाशब्दः, न तु अस्था इत्येवं स्थानिनियमार्थं "निर्दिश्यमानस्यादेशाः भवन्ति" इति परिभाषामवतीर्य श्रीमान् नागेशः अनन्तरं वक्तव्यत्वरूपावसरसङ्गत्या

[१] परिभाषेन्दुशेखरः (भूतिटीकायाम्)
[२] परिभाषेन्दुशेखरः (मूलग्रन्थे)

आदेशनियामिकां "यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः" इतीमां परिभाषामवतारयति, अतः अवसरसङ्गत्या[३] शास्त्रत्वसम्पादनोद्देशनामके प्रकरणे त्रयोदशीमिमां व्याचष्टे परिभाषेन्दुशेखरे ।

परिभाषावतरणम्

चेता इत्यत्र चिञ् चयने धातोः "ण्वुल्तृचौ" [अष्टाध्यायी ३.१.१३३] इति सूत्रेण कर्तरि तृच्प्रत्यये अनुबन्धलोपे सार्वधातुकार्धधातुकाव्यवहितपूर्वत्वविशिष्टस्य इगन्ताङ्गस्य गुणो भवति इत्यर्थकेन "सार्वधातुकार्धधातुकयोः" [अष्टाध्यायी ७.३.८४] इति सूत्रेण गुणे कृते कृदन्तत्वात् प्रतिपदिकत्वे स्वाद्युत्पत्तौ चेता इति रूपम्, अत्र स्थानिनः तालुस्थानकस्य इकारस्य स्थानतः आन्तरतम्यात् एकारो भवति परन्तु तथैव मात्राद्वयन्यूनकालिकत्वरूपप्रमाणतः आन्तरतम्यात् मात्राद्वयन्यूनकालिकः अकारोऽपि भवेत्, तर्हि अकारघटितस्य रूपस्य पाक्षिकत्वापत्तिः भवति । किञ्च अन्यतररूपस्य स्वीकारे विनिगमनाविरहः इत्यत आह—

यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ।

परिभाषार्थविवरणम्

यत्र = अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकाक्रान्तभूते लक्ष्ये, आदेशनियामकतया स्थानिभिः सह आदेशानाम् अनेकविधं = स्थानार्थगुणप्रमाणकृतम्, आन्तर्यं = सादृश्यं, प्राप्तं तत्र = अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकाक्रान्तभूते लक्ष्ये, स्थानतः सादृश्यं बलीयः अर्थात् स्थानकृत्सादृश्यविशिष्टः आदेशो भवति ।

परिभाषायाः प्रमाणोपन्यासः

"षष्ठी स्थानेयोगा" [अष्टाध्यायी १.१.४९] इति सूत्रात् स्थाने इति पदे लब्धे सति "स्थानेऽन्तरतमः" [अष्टाध्यायी १.१.५०] इति सूत्रे स्थाने इति पदं किमर्थं तदेवात्र प्रमाणम् । तथाहि "स्थानेऽन्तरतमः" [अष्टाध्यायी १.१.५०] इति योगो विभज्यते । 'अन्तरतमः' इति प्रथमो योगः । तत्र "षष्ठी स्थानेयोगा" [अष्टाध्यायी १.१.४९] इति सूत्रात् स्वरितत्वप्रतिज्ञाबलात् क्वचिदेकदेशोऽप्यनुवर्तते इति वचनात् स्थाने इति पदमनुवर्तते । तच्च प्रसङ्गार्थकम् । तदा सूत्रार्थः—प्रसङ्गे सति अन्तरतम आदेशो भवति इति ।

[३] परिभाषेन्दुशेखरः (तत्त्वप्रकाशिकाटीकायाम्)

द्वितीययोगे 'स्थाने' इत्यत्र "षष्ठी स्थानेयोगा" [अष्टाध्यायी १.१.४९] इति सूत्रात् प्रसङ्गार्थकं स्थाने इति पदम्, अन्तरतमः इति च उभयमनुवर्तते । 'स्थाने' इति सूत्रे स्थाने इत्यस्य अर्थः स्थानेन इति । तदा एतत्सूत्रार्थः भवति—प्रसङ्गे सति स्थानेन = स्थानघटितधर्मेण अन्तरतमः आदेशो भवति इति । साम्प्रतं विचारः पूर्वसूत्रेण प्रसङ्गे सति सदृशतम आदेशो भवति इत्यर्थः बोधितः । बाधकाभावेन च आन्तरतम्यं स्थानतः गृहीतुं शक्यम् । अतः प्रसङ्गे सति स्थानेन सदृशतमः आदेशः भवति इति द्वितीयवाक्यार्थस्य प्रथमसूत्रस्य वाक्यार्थेन गतार्थत्वात् द्वितीयं स्थाने इति वाक्यं किमर्थम्? तदेव नियमयति यत् स्थानिनः प्रसङ्गे जायमानः आदेशः सति सम्भवे स्थानत एव अन्तरतमः भवति न तु अर्थाद्यन्तरः आदेशः, इति नियमस्यैव फलितार्थरूपा परिभाषेयम् "यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः" इति ।[४]

द्वितीयसूत्रसिद्धनियमे 'सति सम्भवे' इति निवेशस्य प्रयोजनम्

सति सम्भवे स्थानतः अन्तरतम आदेशो भवति यथा चेता इत्यत्र तालुस्थानजन्यत्वधर्मेण सदृशः एकारः भवति । वाग्घरिः इत्यत्र वाग् हरिः इति स्थिते झयः परस्य हस्य पूर्वसवर्णो वा स्यात् इत्यर्थकेन "झयो होऽन्यतरस्याम्" [अष्टाध्यायी ८.४.६२] इति सूत्रेण पूर्वसवर्णः करणीयः । पूर्वः गकारः तस्य सवर्णाः कखगघङाः इमे पञ्च । एतेषां स्थानिना हकारेण सह स्थानतः आन्तर्यं समेषां यतो हि कण्ठस्थानजन्याः इमे, हकारस्यापि जनकः कण्ठः । अतोऽत्र स्थानतः आन्तर्यं न सम्भवति । तदा गुणकृदान्तर्यमाश्रियते अर्थात् असम्भवे तु पूर्वसूत्रेण अन्तरतमः इत्यनेन गुणकृत् अन्तरः भवति । प्रकृते संवारनादघोषवतः हकारस्य संवारनादघोषवन्तः गघडाः प्राप्ताः पुनः महाप्राणस्य हकारस्य महाप्राणः कवर्गीयः चतुर्थो घकारो भवति ।[५]

तृतीयया विपरिणम्य वाक्यभेदेन स्थानिनः प्रसङ्गे जायमानः सति सम्भवे स्थानत एवान्तरतमः इति मूलग्रन्थस्य वाक्ये ल्यबन्तपदोपपत्तिप्रकारः

तृतीयया विपरिणम्य वाक्यभेदेन स्थानिनः प्रसङ्गे जायमानः सति सम्भवे स्थानत एवान्तरतमः इति वाक्यघटके विपरिणम्य पदे क्त्वा स्थानिकः ल्यप् प्रत्ययः वर्तते क्त्वा च समानः कर्ता ययोः धात्वर्थयोः तत्र पूर्वकाले

[४] परिभाषेन्दुशेखरः (भूतिटीकायाम्)
[५] परिभाषेन्दुशेखरः (चन्द्रिकाटीकायाम्)

धात्वर्थे वर्तमानात् धातोः क्त्वा प्रत्ययो भवति इत्यर्थकेन "समानकर्तृकयोः पूर्वकाले" [अष्टाध्यायी ३.४.२१] इति सूत्रेण विधीयते प्रकृते पूर्वकालिकः धात्वर्थः विपरिणामः परन्त्वपरः उत्तरकालिकः धात्वर्थः न श्रूयते अतः समानकर्तृकधात्वर्थयोः अभावात् कथं ल्यबन्तघटितं वाक्यं? समाधीयते यत् तृतीयया विपरिणम्य वाक्यभेदेन स्थानिनः प्रसङ्गे जायमानः "सति सम्भवे स्थानत एवान्तरतमः" इति वाक्ये सम्पादनात्मिकायाः क्रियायाः बोधकं सम्पद्यते इति पदमध्याहार्यं तेन तद्धि तृतीयया विपरिणम्य वाक्यभेदेन स्थानिनः प्रसङ्गे जायमानः सति सम्भवे स्थानत एवान्तरतमः इत्यर्थकं सम्पद्यते इति ल्यबन्तपदघटितं सम्पूर्णवाक्यं सिद्ध्यति ।[६]

"स्थानेऽन्तरतमः" [अष्टाध्यायी १.१.५०] इत्यसमिन् सूत्रे तमब्ग्रहणम् अनेकविधान्तर्यसत्तागमकं वर्तते, अन्यथा = अनेकविधान्तर्याभावे तमब्ग्रहणेन केषां व्यावृत्तिः करणीया स्यात् इति सिद्धान्तितं परिभाषेन्दुशेखरे ।

तमब्ग्रहणस्य अनेकविधान्तर्यसत्तागमकत्वम्

स्थानेऽन्तरतमः इति एकविधमेव सूत्रमस्तु । सूत्रस्थं स्थाने इति पदं स्थानेनेत्यर्थकं भविष्यति, षष्ठी स्थानेयोगा सूत्रादनुवृत्तमानं प्रसङ्गार्थकं भविष्यति अतः सूत्रार्थः प्रसङ्गे सति जायमानः आदेशः स्थानेन सदृशतमो भवति इत्यतः एकमेव एवं विधायकं वाक्यमस्तु योगविभागेन अनेकविधान्तर्यस्य आदेशनियामकं भिन्नं वाक्यमस्ति इत्यत्र न किमपि प्रमाणम् तथैव एवमेकवाक्यस्य सत्वे स्थानेनान्तरतमस्य सम्भवे प्रमाणतः आन्तर्यमादाय अवतरणोक्तदोषदानमपि न सम्भवति, कथं चेतेत्यादौ स्थानतः आन्तर्यात् एकारादीनां सिद्धेः प्रमाणतः आन्तर्यात् अकारोऽपि इत्यवतरणं कथं सङ्गच्छते?

अत्र समाधानम् तमब्ग्रहणमनेकविधान्तर्यसत्तागमकं भवति यदि च स्थानकृतमेवान्तर्यमादेशता नियामकं स्यात् तर्हि "स्थानेऽन्तरः" इत्येव वक्तव्यं स्यात् भगवता पाणिनिना, तमब्ग्रहणस्य न किमपि प्रयोजनं सिद्ध्यति, यतो हि वाग्घरिः इत्यादौ स्थानिवृत्तिसम्भावितयावद्गुणविशिष्टः चतुर्थः एव स्यात् यत्किञ्चित् गुणविशिष्टौ द्वितीयतृतीयौ मा भूतामित्यर्थकं तमब्ग्रहणं सार्थकं

[६] परिभाषेन्दुशेखरः (तत्त्वप्रकाशिकाटीकायाम्)

भवति, परन्तु एकेनैव वाक्येन तदर्थलाभे तमपः आनर्थक्यं स्यात् इत्यतः कृतं यत् तमब्ग्रहणं तदनेकविधान्तर्यसत्तागमकमिति लभ्यते । पुनरत्र शङ्का तमप्प्रत्ययस्य प्रकृत्यर्थैकदेशे आन्तर्ये अतिशयित्वद्योतकत्वम् इति मत्त्वा क्रियते यत् एकयोगस्वीकारे तु अनेकविधान्तर्याभावो भवति तर्हि लाकृतिः इत्यादौ स्थानकृदान्तर्यात् लकार एव भवेत् वकारो मा भूत् इत्यर्थबोधकतया स्थानकृदान्तर्यस्य अतिशयित्वं बोधयति तमब्ग्रहणं तत्र तमब्ग्रहणस्य चरितार्थत्वेन तमब्ग्रहणं योगविभागद्वारा अनेकविधान्तर्यसत्तागमकं कथमेवं वक्तुं शक्यम्? तदा भूतिकृता समाधीयते यत् तमब्ग्रहणमस्त्यतिशयलाभार्थं तदतिशयित्वं च आदेशवृत्तिः गृह्यते तमब्ग्रत्ययस्य प्रकृत्यर्थे धर्मिणि अन्वयः न तु तदेकदेशे आन्तर्ये इति, आदेशवृत्यतिशयत्वं च[७] स्वविशिष्टधर्मवत्त्वरूपं तत्र वैशिष्ट्यञ्च स्ववृत्तित्वम् स्वस्थानिवृतित्वम् स्वेत रयावदादेशावृत्तित्वमिति एतत्त्रितयसंबन्धेन गृह्यते । लाकृतिः इत्यत्र आदेशः ल् स्थानी ऌ समन्वयः प्रकृते सर्वत्रापि स्वपदेन आदेशो गृह्यते अतः आदेशस्य वैशिष्ट्यं धर्मणि नेयं तद्विशिष्टः यः आदेशः तस्यातिशियत्वं तमपा बोध्यते वैशिष्ट्यघटकसंबन्धसमन्वयः स्वम् = आदेशः (लः) तद्वृत्ति धर्मः दन्तस्थानमात्रजन्यत्वं तद्वृत्तित्त्वं दन्तस्थानमात्रजन्यत्वे, स्वम् = आदेशः (लः) तस्य स्थानी ऌ, तद्वृत्ति धर्मः दन्तस्थानमात्रजन्यत्वं, तद्वृत्तित्त्वं दन्तस्थानमात्रजन्यत्वे, स्वम् = आदेशः (लः) तदितरयावन्तः आदेशाः यवराः तेषु अवृत्तिः दन्तस्थानमात्रजन्यत्वं तदवृत्तित्वं दन्तस्थानमात्रजन्यत्वे, स्ववृत्तित्वम् स्वस्थानिवृतित्वम् स्वेतरयावदादेशावृत्तित्वमिति एतत्त्रितयसंबन्धेन आदेशविशिष्टः धर्मः दन्तस्थानमात्रजन्यत्वं जातः । अतः दन्तस्थानमात्रजन्यत्वधर्मविशिष्टः लादेशो भवति । यदि तमपः अभावः स्यात् तर्हि दन्तस्थान जन्यत्वमादाय वकारोऽपि भवेत् ।

तमब्ग्रहणस्य स्वांशे चारितार्थ्यप्रकारः

"स्थानेऽन्तरतमः" [अष्टाध्यायी १.१.५०] इति सूत्रस्य स्थाने तत्स्थाने इत्येव न्यासोऽस्तु । तत्स्थाने इति सूत्रस्य अर्थः स्थानिस्थानकः आदेशो भवति इति । तेन तत्स्थानिनः तदादेशः सेत्स्यति । पुनः अन्तरग्रहणं किमर्थम्? तदन्तरग्रहणमेव सामर्थ्यात् अन्तरतमार्थकं भविष्यति । तर्हि पुनः तमब्ग्रहणं

[७] परिभाषेन्दुशेखरः (भूतिटीकायाम्)

किमर्थम्? तर्हि तद्ग्रहणम् अनेकविधान्तर्यसत्तागमकम् इति समायाति। अपि च तत्स्थाने इति न्यासेन स्थान्यर्थकः आदेशो भवति, स्थानिगुणकः आदेशो भवति, स्थानिमात्रिकः आदेशो भवति एवम् अर्थानां लाभो न भवति। तल्लाभाय सामान्यार्थबोधकस्य अन्तरशब्दस्य आवश्यकता भवति तत्र आदेशवृत्ति-अतिशयित्वलाभार्थं च तमपः चारितार्थ्यं भवत्येव। आहत्य एवं वक्तुं शक्यं यत् "स्थानेऽन्तरतमः" [अष्टाध्यायी १.१.५०] इति सूत्रे स्थानेग्रहणम् अवर्णादि जनकस्थानार्थकं न, अपि तु प्रसङ्गार्थकमेव वर्तते तर्हि "षष्ठी स्थानेयोगा" [अष्टाध्यायी १.१.४९] इति सूत्रात् प्रसङ्गार्थकस्य स्थानेग्रहणस्य लाभे सिद्धे सूत्रस्थं स्थानेग्रहणं व्यर्थं सत् योगविभागद्वारा स्थानिनः प्रसङ्गे जायमानः सति सम्भवे स्थानतः एव अन्तरतमः इति नियमं विधाय परिभाषार्थं बोधयति।

केवलं तमब्ग्रहणं वाक्यभेदबोधनद्वारा अनेकविधान्तर्यसत्तागमकमिति मतस्य निराकरणम्

श्रीमता नागेशेन परिभाषेन्दुशेखरग्रन्थे तमब्ग्रहणविशिष्टं स्थानेग्रहणं वाक्यभेदद्वारा परिभाषां बोधयन् अनेकविधान्तर्यसत्ता बोधकमिति सिद्धान्तितम्, किञ्च तमपः चारितार्थ्यं तु स्थाने = प्रसङ्गे जायमानः आदेशः सदृशतमः भवति इत्येकस्यैव वाक्यस्य बोधनेऽपि सम्भवत्येव अतः तमबेव वाक्यभेदद्वारा अनेकविधान्तर्य सत्ताबोधकमिति न युक्तं, एवमेव शेखरकारस्य मूलोक्तिरप्यसङ्गता भवति तत्र परिभाषायां प्रमाणावसरे भणितं यत् तद्धि = स्थानेग्रहणं, तृतीयया विपरिणम्य वाक्यभेदेन स्थानिनः प्रसङ्गे जायमानः सति सम्भवे स्थानत एवान्तरतम इत्यर्थकमिति केवलतमब्ग्रहणस्य वाक्यभेदबोधनद्वारा अनेकविधान्तर्यसत्तागमकत्वे तु एतन्मूलाक्षरस्वारस्यस्य भङ्गापत्तिः, अतः तमब्ग्रहणविशिष्टं स्थानेग्रहणं वाक्यभेदद्वारा परिभाषां बोधयन् अनेकविधान्तर्यसत्ता बोधकमिति सिद्धम्।[८]

स्थानकृदान्तर्यं इको यणचि इत्यादौ प्रसिद्धं यथा ध्यै चिन्तायामिति धातोः ध्यायतेः अन्येभ्योऽपि दृश्यते इति सूत्रे पठितेन सम्प्रसारणं चेति वार्तिकेन क्विपि यकारस्य सम्प्रसारणे इकारे, सम्प्रसारणाच्चेति पूर्वरूपे, अङ्गावयवाद्धलो यदुत्तरं सम्प्रसारणम् तदन्तस्य अङ्गस्य दीर्घो भवतीत्यर्थकेण हलः इति सूत्रेण दीर्घे च धीशब्दः। सुष्ठु ध्यायन्तीति सुधियः अथवा सु =

[८] परिभाषेन्दुशेखरः (तत्वप्रकाशिकाटीकायाम्)

शोभना धीर्येषामिति सुधियः, तैः सुधीभिरुपास्यः सुद्ध्युपास्यः "कर्तृकरणे कृता बहुलम्" [अष्टाध्यायी २.१.३२] इति सूत्रेण तृतीयातत्पुरुषसमासः, ततः प्रतिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" [अष्टाध्यायी २.४.७१] इति भिसो लुकि सुधी उपास्य इति स्थिते ईकारस्य स्थाने यकारः "इको यणचि" [अष्टाध्यायी ६.१.७७] सूत्रेण भवति, एकस्येकारस्य स्थानिनः चत्वारः यवरलादेशाः प्राप्ताः यतो हि यथा यकारः यण् तथैव वरलाः अपि यणः, तदा "स्थानेऽन्तरतमः" [अष्टाध्यायी १.१.५०] इति सूत्रेण प्रसङ्गे सति स्थानेन सदृशतमः तालुस्थान मात्रजन्यत्वविशिष्टस्य इकारस्य तालुस्थानमात्रजन्यत्वविशिष्टः यकारो भवति, तथैव मद्गुरिः इत्यत्र ओष्ठस्थान मात्रजन्यत्वविशिष्टस्य उकारस्य ओष्ठस्थानमात्रजन्यत्वविशिष्टः वकारो भवति, तथैव धात्त्रंशः इत्यत्र मूर्धास्थान मात्रजन्यत्वविशिष्टस्य ऋकारस्य मूर्धास्थानमात्रजन्यत्वविशिष्टः वकारो भवति, तथैव लाकृतिः इत्यत्र च दन्तस्थानमात्रजन्यत्वविशिष्टस्य ऌकारस्य दन्तस्थानमात्रजन्यत्वविशिष्टः लकारो भवति ।

अर्थतस्तु शस्-प्रभृतिषु प्रत्ययेषु परेषु पद्-दत्-नस्-मास्-हृत्-निश्-असन्-यूषन्-दोषन्-यकन्-शकन्-उदन्-आसन् एते आदेशाः विकल्पेन भवन्ति इत्यर्थकं "पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्-प्रभृतिषु" [अष्टाध्यायी ६.१.६३] इति सूत्रं वर्तते, यद्यप्येतस्मिन् सूत्रे स्थानिनः न निर्दिष्टाः तथापि स्थान्यर्थाभिधानसमर्थस्यैव आदेशता इति सिद्धान्तात् पादादीनां येऽर्थाः तदर्थकाः एव पदादयः आदेशाः अपि च स्थानिवर्णसमानवर्णाः पादादीनां पदादयः भवन्ति, तत्त्वप्रकाशिकाकारमतेन सप्तम्यन्तपाठपक्षे सादृश्यानुयोगिनि स्थानिनि आदेशः इत्यर्थो भवति उपस्थितत्वाच्च आदेशप्रतियोगिकं सादृश्यं गृह्यते, तच्च प्रतियोगिवृत्तिधर्मवत्त्वं, एवञ्च शसाद्यव्यवहितपूर्वस्य पदादयः इति विधानेन पदादिप्रतियोगिक धर्मानुयोगिनः स्थानित्वे नाभिप्रेताः पदादिप्रतियोगिकधर्मानुयोगितायाः पादादिषु सत्त्वेन त एव स्थानित्वेन आक्षिप्ताः, न तु चरणादयः । तेन तत्तदर्थकाः आदेशाः सिद्ध्यन्ति, परन्तु "पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु" [अष्टाध्यायी ६.१.६३] इति सूत्रं शसादौ पदादिघटिताः प्रयोगाः साधवः पादादायः तत्रासाधवः अतः तत्र पदादिघटिताः प्रयोक्तव्याः इति प्रयोग नियमार्थं

वर्तते, न तु स्थान्यादेशभावबोधकमत एव मूले अर्थकृतः द्वितीयमुदाहरणं तृज्वत्क्रोष्टुः इति दत्तं तत्र प्रत्ययग्रहणपरिभाषया तृच् इति तृजन्तं गृह्यते । "तेन तुल्यं क्रिया चेद्वति" [अष्टाध्यायी ५.१.११५] इति तृतीयान्ताद्वतिः "इतोऽत् सर्वनामस्थाने" [अष्टाध्यायी ७.१.८६] इत्यतः सर्वनामस्थाने इति "सख्युरसम्बुद्धो" [अष्टाध्यायी ७.१.९२] इत्यतोऽसम्बुद्वाविति चानुवर्तते, सूत्रार्थः क्रोष्टुः तृजन्तेन तुल्यं वर्तते असम्बुद्धौ सर्वनामस्थाने परे, सप्तस्वतिदेशेषु मध्ये प्राधान्यादिह तृजन्तरूपमेव अतिदिश्यते । तच्च न कर्तृ भर्तृ इत्यादि तृजन्तरूपम्, अपि तु क्रोष्टृ इत्येव तृजन्तरूपम् अतिदिश्यते । क्रुश्धातोरुपस्थितत्वात् स्थान्यर्थाभिधानसमर्थस्य आदेशत्वात् अर्थतः आन्तर्याच्च कोष्टुशब्दस्य स्थाने क्रोष्टृ-आदेशो भवति ।

निष्कर्षः

चेता इत्यत्र स्थानिनः तालुस्थानकस्य इकारस्य स्थानतः आन्तरतम्यात् एकारो भवति परन्तु तथैव मात्राद्वयन्यूनकालिकत्वरूपप्रमाणतः आन्तरतम्यात् मात्राद्वयन्यूनकालिकः अकारोऽपि भवेत् तर्हि अकारघटितरूपस्य पाक्षिकत्वापत्तिः भवति । अतः "यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः" इति परिभाषया वारणम्, यत्र = अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकाक्रान्तभूते लक्ष्ये, आदेशनियामकतया स्थानिभिः सह आदेशानाम् अनेकविधं = स्थानार्थगुणप्रमाणकृतम्, आन्तर्यं = सादृश्यं, प्राप्नं तत्र = अप्रवृत्तनित्यविध्युद्देश्यताव च्छेदकाक्रान्तभूते लक्ष्ये, स्थानतः सादृश्यं बलीयः अर्थात् स्थानकृत्सादृश्यविशिष्टः आदेशो भवति इति निष्कृष्टार्थः । "षष्ठी स्थानेयोगा" [अष्टाध्यायी १.१.४९] इति सूत्रात् स्थाने लब्धे सति "स्थानेऽन्तरतमः" [अष्टाध्यायी १.१.५०] इति सूत्रे स्थाने इति पदं किमर्थं तदेवात्र प्रमाणम्, योगो विभज्यते अन्तरतम इति प्रथमो योगः तत्र "षष्ठी स्थानेयोगा" [अष्टाध्यायी १.१.४९] इति सूत्रात् स्थाने इति पदमनुवर्तते तच्च प्रसङ्गार्थकम् तदा सूत्रार्थः प्रसङ्गे सति अन्तरतम आदेशो भवति, द्वितीययोगे स्थाने इत्यत्र "षष्ठी स्थानेयोगा" [अष्टाध्यायी १.१.४९] इति सूत्रात् स्थाने, अन्तरतमः इत्युभयमनुवर्तते स्थाने सूत्रस्थ स्थाने शब्दार्थः स्थानेन तदा एतत्सूत्रार्थः प्रसङ्गे सति स्थानेन = स्थानघटितधर्मेण अन्तरतमः आदेशो भवति । साम्प्रतं विचारः पूर्वसूत्रेण प्रसङ्गे सति सदृशतम आदेशो भवति इत्यर्थः बोधितः, द्वितीयवाक्यार्थस्य

प्रथमसूत्रस्य वाक्यार्थेन गतार्थत्वात् द्वितीयं स्थाने इति वाक्यं किमर्थम्? तदेव नियमयति यत् स्थानिनः प्रसङ्गे जायमानः आदेशः सति सम्भवे स्थानत एव अन्तरतमः भवति न तु अर्थाद्यन्तरः आदेशः, इति नियमस्यैव फलितार्थरूपा परिभाषेयम् "यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः" इति। तमब्ग्रहणमनेकविधान्तर्य सत्तागमकं भवति यदि च स्थानकृतमेवान्तर्यमादेशता नियामकं स्यात् तर्हि स्थानेऽन्तरः इत्येव वक्तव्यं स्यात् भगवता पाणिनिना, तत्स्थाने इत्येव सिद्धे सूत्रार्थः स्थानिस्थानकः आदेशो भवति तेन तत्स्थानिनः तदादेशः सेत्स्यति पुनः अन्तरग्रहणं किमर्थं तदन्तरग्रहणमेव सामर्थ्यात् अन्तरतमार्थकं भविष्यति तर्हि पुनः तमब्ग्रहणं किमर्थं तर्हि तद्ग्रहणम् अनेकविधान्तर्यसत्तागमकं इति समायाति अपि च तत्स्थाने इति न्यासेन स्थान्यार्थादीनां लाभो न भवति तल्लाभाय सामान्यार्थबोधकस्य अन्तरशब्दस्य आवश्यकता भवति तत्र आदेशवृत्ति अतिशयित्वलाभार्थं च तमपः चारितार्थ्यं भवत्येव। निष्कर्षरूपेण एवं वक्तुं शक्यं यत् "स्थानेऽन्तरतमः" [अष्टाध्यायी १.१.५०] इति सूत्रे स्थानेग्रहणम् अवर्णादिजनकस्थानार्थकं न, अपितु प्रसङ्गार्थकमेव वर्तते तर्हि "षष्ठी स्थानेयोगा" [अष्टाध्यायी १.१.४९] इति सूत्रात् प्रसङ्गार्थकस्य स्थानेग्रहणस्य लाभे सिद्धे सूत्रस्थं स्थानेग्रहणं व्यर्थं सत् योगविभागद्वारा स्थानिनः प्रसङ्गे जायमानः सति सम्भवे स्थानतः एव अन्तरतमः इति नियमं विधाय परिभाषार्थं बोधयति।

✶ ✶ ✶

Bibliography

1. *परिभाषेन्दुशेखरः* (चन्द्रिकाबालबोधिनिविभूषितः); नागेशभट्ट; श्रीपादसत्यनारायण- मूर्तिः (सम्पादकः); राष्ट्रियसंस्कृतविद्यापीठम्; तिरुपतिः; २००४।
2. *लघुशब्देन्दुशेखरः* (बालबोधनीव्याख्यासहितः); नागेशभट्टः; श्रीपादसत्यनारायणमूर्तिः (व्याख्याकारः); प्रो. हरेकृष्णशतपथी (सम्पादकः); राष्ट्रियसंस्कृतविद्यापीठम्; तिरुपतिः; २००७।
3. *अष्टाध्यायी;* पाणिनि; चौखम्भा कृष्णदास अकादमी; वाराणसी; २००८।
4. *पातञ्जलं महाभाष्यम्* (प्रदिपोद्योतशब्दकौस्तुभसहितम्); पतञ्जलिः; बालशास्त्री (सम्पादकः); वाणीविलासप्रकाशनम्; वाराणसी; १९९८।

5. *व्याकरणमहाभाष्यम्;* पतञ्जलिः ; गुरुप्रसादशास्त्री (सम्पादकः) ; प्रतिभाप्रकाशनम् नईदिल्ली ; १९९९ ।
6. *वैयाकरणसिद्धान्तकौमुदी;* भट्टोजिदीक्षितः ; गिरिधरशर्माचतुर्वेदः (सम्पादकः) ; मोतीलाल बनारसीदास ; वाराणसी ; २०१० ।
7. *परिभाषेन्दुशेखरः* (तात्याशास्त्रिकृतभूतितिलकविभूषितः) ; श्रीनागेशभट्ट ; श्रीगोविन्दशर्मा (सम्पादकः) ; वासुदेवबालकृष्णपटवर्धनः ; राजराजेश्वरी प्रेस-पुस्तकालय ; वाराणसी ; १९८२ ।

✳ ✳ ✳